|| **श्री स्वामी समर्थ** ||

---

## || श्री सिद्धि देवी कवच ||

---

श्रीगणेशाय नमः ।
देव्य उवाच ।
कवचं सिद्धलक्ष्म्यास्तवं ब्रुहि देव सदाशिव ।
श्री शिव उवाच ।
सिद्धेः कवच मन्त्रस्य सदाशिव ऋषिस्स्मृत ।
अनुष्टुप् छन्दः आख्यातं सिद्धलक्ष्मिस्तु देवता ।
ॐ बीजं श्रीं शक्तिः स्वाहा वै कीलकं स्मृतं ।
श्रां इत्यादि दीर्घषट्कैः न्यासश्च परिकीर्तिताः ॥१॥
ध्यानं ।
वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदाम भाग्यदाम ।
भक्ताभिष्ट फ़लप्रदां हरिहरब्रह्मादिभिःसेविताम ॥२॥

हस्ताभ्यामभयप्रदां मणि-गणैर्नानाविधैर्भूषितां ।
पार्श्वे पङ्कज शङ्ख पद्म निधिभिःयुक्तां सिद्धिभिः ॥३॥

ॐ पुरस्ताद् अणिमा पातु पश्च्यान्मे महिमावतु ।
गरिमा दक्षिणे पार्श्वे लघिमा पातु चोत्तरे ॥४॥

आग्नेयां पातु मां प्राप्तिःप्रकाम्यं राक्षसीं दिशं ।
ईशित्वं पातु वायव्यां वशित्वं शांभवीं दिशं ॥५॥

ऊर्ध्वतो मुक्तिसिद्धिर्मे अधःस्तात पातु भुक्तिदा ।
एवं दश दिशो रक्षेत सर्वान्गःविघ्ननाशिनि ॥६॥

शिखायां कमला पातु मूर्धन्या आकाशरूपिणी ।
द्वादशान्तस्थनिलया भालदेशं सदावतु ॥७॥

ब्रह्मभावप्रदासिद्धिःभ्रूमध्यं तिलकोज्वला ।
श्रोत्रयोर्ज्ञान सन्दात्री नेत्रयो कमलेक्षणा ॥८॥

कपोलयोः ब्रह्मभावा कर्णमुले अमृतप्रदा ।
दन्त मध्ये रमा पातु महालक्ष्मीर्मुखं सदा ॥९॥

चिबुके नासिके चैव लक्ष्मीचंपङ्कनासिका।
उत्तरोष्ठे जगद्वन्द्या त्वधरोष्ठे अमृतप्रदा ॥१०॥

श्रीविध्या लक्ष्मीर्जीव्हायां तालु भक्तप्रियङ्करी ।
चिन्तामणि महालक्ष्मीः कण्ठ मे चिन्तितार्थदा ॥११॥

स्कन्धौ मे वल्लभा पातु सिद्दलक्ष्मीःस्तनौ सदा ।
हस्तौ पातु पद्महस्ता बाहुमुले गुनेश्वरि ॥१२॥

अङ्गुलिःयोगिनी सेव्या नखरान सिद्ध् सेविता ।

आन्त्रं वैनायकि पातु मनस्वानान्दरूपिणी ॥१३॥

पञ्चप्राणान महासिद्धिः वीरलक्ष्मीर्यशोवतु ।
हृदयं श्री महासिद्धिः निजलोकनिवासिनि ॥१४॥

उदरं लोकजननीं नाभिं पातु वरप्रदा ।
कटिं मे सुन्दरी पातु मध्यं मे मङ्गलप्रदा ॥१५॥

मेढ्रं मे केशजननी तत्पार्श्वं ललितार्चिता ।
अण्डं मे प्रकृतिः पातु बुधं मायास्वरुपिणी ॥१६॥

राजयोगं प्रदाशुक्लं उरु पातु हठप्रदा ।
जङ्घयोर विश्वमूतिर्मे जानु मध्ये शिवास्नुषा ॥१७॥

सांराज्ञी पातु मे गुल्फ़म् लक्षकोर चंडनायिका ।
पादयोः पातु हेरम्ब महाताण्डवसाक्षिणी ॥१८॥

सर्वाङ्गं सर्वसन्धौच मूलाज्ञानविनाशिनि ।
पुत्रमित्रकळत्रादीन राजलक्ष्मी निरन्तरं ॥१९॥

वीरलक्ष्मीर सदा पातु पशुरत्नदि संपदः ।
मृतसंजीवनी सिद्धि रोगेभ्यः पातु मांसदा ॥२०॥

संसारात पातु मां सिद्धिः गणेशाङंकनिवासिनी ।
इदं श्री सिद्धि कवचं महारोगी निवारणं ॥२१॥

दरिद्य दुखः शमनं सर्वसंपत्प्रदायकं ।
धर्मार्थकामदं नृणां मोक्षदं तु विशेषतः ॥२२॥

यः पठेद्छृणुयाद्वापि प्रातःकाले दिने दिने ।
स्वानन्द् वासिन्याः सिद्धि देव्याः प्रसादतः ॥२३॥

प्राप्त्यादि सिद्दयस्तस्य भवन्ति परिचारिकाः ॥२४॥

इह भुक्ता खिलान्भोगानन्ते कैवल्य मापनुयात ॥२५॥
॥इति श्री विनायक तंत्रे श्री
सिद्धि देवी कवच नाम पञ्चदशः पटलः ॥

---

॥ श्री गुरुदत्तात्रेयार्पणमस्तु ॥
|| श्री स्वामी समर्थार्पण मस्तु||